Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 1 | ISSN : 2581- 6306

# अन्त्येष्टिसंकार: श्राद्धकर्मणश्च प्रतिपादनम्

कैलाश चन्द्र बुनकर
प्राचार्य, राजकीय लक्ष्मीनाथ शास्त्री संस्कृत, महाविद्यालय, चीथवाड़ी, जयपुर।

**शोधसारांश:-** गृह्ययज्ञानां वैशिष्ट्यं तदन्तर्गतक्रियमाणानां विविधकृत्यानां च वैज्ञानिकं प्रतिपादनमत्र सुविज्ञातं प्रतीयते। अस्यां टीकायां कृत्यविशेषे सन्दर्भितनिर्देशा कर्मकाण्डीयदृष्ट्या विशेषमहत्त्वपूर्णा: सन्ति। मध्ये मध्ये सूत्रकारमतविमर्श: विषयावबोधाय उपयोगी लक्ष्यते, यत्र सूत्रोक्ततथ्यानां स्पष्टीकरणं कृतमस्ति। यतो हि सूत्रे संक्षेपेण विधिकथनं यत्र विद्यते तत्र प्रक्रियाबोध: सम्यग् न भवति, अतएव टीकाकार: अस्यावधानं रक्षमाणो वर्तते। यथावश्यकं कर्मप्रयोज्यमन्त्रा: संकेतिता: सन्ति। तत्रानेके सूत्रकाराद्भिन्ना अपि सन्ति। टीकाकार: अपेक्षिकविषयाणां विस्तरेण प्रतिपादनं करोति। तेन टीकान्तरापेक्षयाऽप्यस्या: टीकाया वैशिष्ट्यं विज्ञातं भवति।

**मुख्यशब्दा:-** अन्त्येष्टिसंकार: , प्रतिपादनम् , टीकाकार:, श्राद्धकर्मण:, आश्वलायन:, पुरुषा: ।

---

गृह्यसूत्र काराणां मतेऽन्त्येष्टि: क्रियाविशेषोऽस्ति, न तु संस्कार:। अतएव संस्कारप्रकरणेऽस्य प्रतिपादनमकृत्वा पृथग्रूपेणात्र प्रतिपादनं कृतं वर्तते। प्रथमकण्डिकात: पञ्चमी कण्डिका यावत् आश्वलायन: अन्त्येष्टि-संस्कारस्यैव वर्णनं करोति। तत्पश्चात् शान्तिकर्मण उल्लेखं षष्ट्यां कण्डिकायां करोति। सप्तमी कण्डिकात: अष्टमीकण्डिका यावत् श्राद्धकर्मण: प्रतिपादनं करोति। तदनन्तरमन्तिमायां कण्डिकायां शूलगवं प्रतिपादयति।

विमलोदयमालाकार: सर्वप्रथममिदं प्रतिपादयति यत् आचार्य आश्वलायनेन अत्र यत् अन्त्येष्टिकर्म प्रतिपादितं तदाहिताग्निम् अधिकृत्य कृतमस्ति। तेन संशयो भवति यत् अनाहिताग्ने: मृते अयमेव विधिभिन्नो वेति विषये मतद्वयं वर्तते।

प्रथममतानुसारं अयं विधिरनाहिताग्नेर्न भवति। अत्र प्रामाण्यं दर्शयति –

"यत्नाभावादन्यथा हि यत्नं करोति यथा एवमनाहिताग्निर्नित्ये श्रपयित्वाऽति प्रणीय जुहुयादिति एवमनाहिताग्निर्गृह्य इति तस्मान्न भवति[1]।" द्वितीयमतानुसारं अयमेव विधिरनाहिताग्नेरपि भवति। अत्र प्रामाण्यं दर्शयति –

भवतीत्यपरे। कस्मात्। प्रकरणसामर्थ्यात्[1] ।

(ख) शवदाहात्पूर्वकरणीयानि कृत्यानि

आचार्य आश्वलायन: शवदाहात्पूर्व क्रियमाणानां कर्मणामुल्लेखं सर्वप्रथम विदधाति। तद्यथा दर्शयितुं शक्यन्ते –

(i) शववहनम्

(ii) शवयात्रा (अत्र विशेषनिर्देश: – पुरुषा: स्त्रियश्च पृथक् पृथक् समूहे गमनं कुर्यु:।
बन्धुबान्धवाश्च अधोनिवीता: भूत्वा विसृष्टशिखा: सन्तोऽनुगच्छेयु:[2]।)

(iii) अनुस्तरणी (एकवर्णा गौरथवा कृष्णवर्णा अजा अनुस्तरणीरूपेण ग्राह्या सा च पाशबद्धा एव नेतव्या[3]।)

(iv) दाहस्थानशोधनम् (आश्वलायन: ओषधिमयं कण्टकि-क्षीरि-वृक्षयुतं जलरहितं स्थानं दाहकर्मणे उचितं निर्दिशति[4]।)

(v) चितानिर्माणम्

(vi) प्रेतसंवेशनम्

(vii) अनुस्तरण्या वपया प्रेतशिरोमुखाच्छादनम् कराच्छादनम् हृदयाच्छादनं च।

(viii) पत्न्या अनुशयनम् तदुत्थानं च

(ix) धनुराधानमुत्थापनं च

(x) पात्रासादनम्

उक्तदर्शितकर्मभ्योऽनन्तरं दाहकर्मारभते। तदानीं दक्षिणाग्नौ संस्कर्ता आहुतीर्ददाति। अत्र आहिताग्न्यर्थं पञ्चाहुतिप्रदानस्य विधानम् प्रतिपादितमस्ति। अस्मिन् पञ्चम्याहुतिविषये विशेष प्रतिपादयति विमलोदयमालाकारः –

“किं च पञ्चमीमुरसि प्रेतस्येति पञ्चमीग्रहणं तदर्थमिति व्याचक्षते। यदुक्तमन्यत्र यत्नकरणात् इति, यत्नाभावान्न प्राप्नोतीति। तत्र चानेन सर्वत्र। न चात्र प्राप्त्यर्थमेवाति प्रणीय जुहुयादित्येवमादिविशेषाङ्गविधानार्थञ्च। इह तु सामर्थ्याच्छरीरविनियोगार्थं यत्नाद्धतेऽपि भवत्येवं प्रयोगमपि कुर्वन्तो दृश्यन्ते।[1]” इति।

अथ मतान्तरं प्रस्तौति –

“ये नेच्छन्ति तेऽपि पञ्चमीग्रहणमाहिताग्न्यधिकार एव नियम्य सम्पादयन्ति।[2]” इदं प्रकरणविधानमिति चेत् प्रकरणविधानस्याप्यौचित्यं दर्शयति –

“प्रकरणविधानं शान्तिकर्मविवक्षया ऋत्विग्वरणवत्। ऋत्विग्वरणमनाहिताग्नेः प्रयोजनाभावात् केवलं तच्छेष एव तस्मात्तस्येह विधानमनाहिताग्नेः प्राप्त्यर्थमेव, तस्य दृष्टप्रयोजनत्वादेव विधानम्।[3]” इति।

अथ प्रेताधिकारे पुनः प्रेतग्रहणं प्रेतसामान्यप्रतिपत्त्यर्थमित्यनुपनीतानामप्यनेनैव दहनं कुर्वन्ति[4]। इति।

शवदाहानन्तरं क्रियमाणसि कृत्यानि –

(i) **तिलाञ्जलिदानम्** - “अत्र विमलोदयमालाकारः उल्लिखति– तत्र सकृदुन्मज्याऽऽचम्य दक्षिणाप्रवणे स्थण्डिले तृणमन्तर्धाय दक्षिणामुखाः प्राचीनावीतिनस्तिक्तमिश्रितमेकमञ्जलि मुत्सृजन्त्यो युग्माः समाश्चेत्सम्बन्धितोऽयुग्माश्चान्ये गोत्रनामोच्चारणेन एतत्ते उदकमिति ब्रूते।[1]”

तिलाञ्जलिदानाय कालावधिरपि निर्दिष्टः। तद्यथा –

“तत उत्तीर्यान्यानि वासांति परिधाय मुक्तानि सकृदापीड्योदग्राणि विसृजन्ति शोषणार्थं, ततः आनक्षत्रदर्शनादासते रश्मिवर्जितादित्यमण्डलदर्शनाद्वा।[2]”

अत्र रात्रौ दाहसंस्कारे कृते मतान्तरे विशेषनिर्देशोऽप्युक्तः –

“केचिद्रात्रौ संस्कुर्वान्ति, ते परेधुरादित्यमण्डलदर्शनं यावदासते।[3]”

(ii) **गृहपरावर्तनं गृहप्रवेशः** - तिलाञ्जलिदानानन्तरं बान्धवाः गृहं प्रत्यावर्तन्ताम्। अत्र आश्वलायनः प्रतिपादयति – आदित्यदर्शने एव गृहे प्रविशेयुरिति’। गृहप्रवेशने क्रमं कर्मान्तराणि च निर्दिशति, तन्मतमनुसृत्य विमलोदयमालाकारः “कनिष्ठप्रथमा ज्येष्ठजघन्या आनुपूर्येण प्राप्य गृहमश्मानं अग्निं गोमयम् अक्षतान् तैलमापश्चोपस्पृशेयुः[1]। नैतस्यां रात्र्यामन्नं पचेयुः। न चाश्नीयुः[2] ।

तत्पश्चात् त्रयोदशाहं यावत् सायं प्रातः तिलोदकं देयं भवति। इदं तिलाञ्जलिदानं सकृदेव विधीयते। केवलमुदकदानविषयेऽयं टीकाकार उल्लिखति यत् विषमदिवसेष्वेवोदकं दीयते। यथोक्तम् तत्रैव विमलोदयमालायाम् –

“उदकदानस्य च स्मृतौ प्रथमं तृतीय–पञ्चम–सप्तम–नवमेषूदकक्रिया।[3]”

आश्वलायनमतेनायं बलिहरणं दशम्यां निर्दिशति। मतान्तरं प्रति नास्त्यस्य विमतिः अतएवोल्लिखति – ‘पूर्ववदेव शास्त्रान्तरे दृष्टत्वादिति।’

(iii) **एकादशाहानन्तरमस्थिसंचयनम्** - दशाहेऽतिक्रान्ते एकादशाहः विशिष्टो भवति। अस्मिन्दिवसे यथाविहितमेकोद्दिष्टं समाचरेदिति निर्दिश्य विमलोदयमालाकारः अस्य कालविषये विशेष निर्दिशति। एकादशाहे गते एवास्थिसंचयनं कुर्यात्। तत्रापि काल उद्दिष्टः –

"अथ संचयनं कृष्णपक्षस्यायुजासु तिथिषु एकनामनक्षत्रे एकतारानक्षत्रे, तन्नाम यद्येकस्यैव नक्षत्रस्य भवति तस्मिन् वा कर्त्तव्यम्।[4]"

पुंसः स्त्रियश्चास्थिसंचयने आश्वलायनमतमेवाविकलरूपेणायं प्रवक्ति यत् अलक्षणे कुम्भे पुंसः अस्थीनि संचिनुयुः। अलक्षण्यां कुम्भ्यां च स्त्रियः। तदनन्तरं अस्थि संचयनविधिम् उल्लिखति "कर्ता क्षीरोदकेन शमीशाखया त्रिः प्रसव्यमायतनं परिव्रजन् प्रोक्षति। शीतिके शीतिकावतीत्येतया मन्त्रान्ते त्रिः परिव्रजन त्रिरपि मन्त्रावृत्तिः कार्या। ततः संचिनुयुः।[1]"

सञ्चयनक्रमोऽप्यत्रोक्तः। यथा

"पादतः प्रभृत्याशिरः क्रमेणैवाङ्गुष्ठोपकनिष्ठिकाभ्यामेकैकमस्थि संगृह्यान्तः कुम्भेऽवदध्युः। ततः शूर्पण सुसंचितं संचित्य यत्र वर्षाभ्योऽन्या आपो नावस्यन्देरन् तत्राभिमत आकाशमित्येवमादिलक्षणं संयुक्ते देशेऽवदध्युः[2]।"

एवमस्थिसंचयनं कृत्वा गर्त खात्वा तस्मिन् गर्ते तान्यस्थीनि निधाय पांसुना गर्त पूरयेदिति निर्देशोऽत्र प्राप्यते। एतदनन्तरमेवास्थिकुम्भमपि गर्ते निधाय तथैव पांसुना पूरयेत इति निर्देशः। गर्तेऽस्थिकुम्भस्थापनकाले उच्चारणीयमन्त्रस्यापि निर्देशो यथाश्वलायनेन कृतस्तथैवोदाहरति टीकाकारः[3] –

"उर्ध्वञ्च स्वपृथिवी.'' इति "उपसर्प मातरं भूमिमेतां. " इति च।

ततो गृहमागत्यैकोद्दिष्टं कुर्यात्।

(iv) **शान्तिकर्म** - आश्वलायनगृह्यसूत्रे गुरोर्मृत्यौ सत्यां द्वादशाहानन्तरं शान्तिकर्मणोऽपि विधानं प्राप्यते। इदं कर्म अमावास्यायां तिथौ करणीयं भवति। तस्मिन् दिवसे सूर्योदयात् पूर्वं 'क्रव्यादमग्निं प्रहिणोमि दूरं.' इति अर्धर्चमुच्चारयन् भस्मसहितं गृह्याग्निं नीत्वा दक्षिणायां दिशि चतुष्पथे स्थाप्य सर्वे स्त्रीपुरुषाः वामहस्तेन वामजंघां ताडयन्तः अप्रदक्षिणक्रमेण त्रिः परिक्रामन्ति। तदनन्तरं केशवपनं नखवपनं च कृत्वा स्नानं कुर्वन्ति। स्नानानन्तरम् शमीशाखाभ्यः अरणिमन्थनं कृत्वाऽग्निं प्रज्वालयति। तमग्निमभितः रात्रिपर्यन्तं स्थित्वा माङ्गलिकं कथानकं श्रृण्वन्ति। अन्येद्युः गृहमागत्य सर्वे संस्कर्तारः 'तन्तुं तन्वन्नजसो.' इति मन्त्रेण जलधारया गृहमुखे दक्षिणतः उत्तरं गृहं पावयन्ति।[1]

(v) **परिधिपरिधानम्** - इदमपि कर्मान्तरं शान्तिकर्मस्यैवाङ्गत्वेन प्रतिपादितमस्ति आश्वलायनगृह्यसूत्रे। विमलोदयमालाकारोऽपि यथावदस्योल्लेखं करोति। अस्मिन् कर्मणि विधिपूर्वकमग्निमाधाय तस्मात् पश्चिमस्यां दिशि प्राग्नीवोत्तरलोम्नोऽनडुहस्य चर्मास्तीर्य सर्वे संस्कर्तारः उपविशन्ति। ततस्ते 'आरोहतायुर्जरसं.' इति मन्त्रमुच्चारयन्ते।[2] पश्चात् मुख्यः संस्कर्ता इदं जीवेभ्यः इति मन्त्रेण शम्यां परिधिं स्थाप्य दक्षिणोत्तरयोः क्रमशः एकैकं परिधिं स्थापयति। तत उत्तरस्यामेव पाषाणखण्डं स्थापयति। पश्चात् 'परं मृत्यो.' इत्यादिभिश्चतुर्भिः ऋग्भिः चतस्र आहुतीर्जुहोति। सर्वान् संस्कर्तृन् (अमात्यान्) पश्यति। तदनन्तरं सर्वाः स्त्रियः कुशैर्नवनीतं गृहीत्वा नेत्रयोरड्.क्त्वा पार्श्वमपश्यन् कुशपिंजूलान् प्रक्षिपन्ति। ततो मुख्यसंस्कर्ता 'इमा नारीरविधवा.' इति मन्त्रोच्चारणपूर्वकं ताः स्त्रियः दृष्टवा 'अश्मन्वतीरीयते.' इति मन्त्रोच्चारणेन पाषाणखण्डं स्पृशति।' पश्चात् सर्वे 'आपो हि ष्ठा.' इति तृचेन जलधारामविच्छिन्न–रूपेणाग्निमभितः पातयन्ति। मुख्यः संस्कर्ता उत्तरपूर्वस्यां स्थित्वा परी मे गामनेषत.' इति मन्त्रं जपति। अयं जपः आसूर्योदयं विधीयते। परेधुः ब्राह्मणभोजनमाशीर्लाभश्च क्रियेते।

**(ग) श्राद्धकर्म** - पितृन् उद्दिश्य सश्रद्धं ब्राह्मणेभ्यो देयं दानं श्राद्धमुच्यते इति गृह्यसूत्रकाराः धर्मसूत्रकाराः स्मृतिकाराश्च कथयन्ति, किन्तु वस्तुतः श्राद्धं पितृणां तुष्ट्यै क्रियमाणं कर्मास्ति, येन तृप्ताः पितरः मानवस्य सर्वविधमुपकारं तथैव कुर्वन्ति, यथा यज्ञकर्मभिर्देवाः कुर्वन्ति। श्राद्धं कतिविधम् इति विषये सूत्रकारेष्वैकमत्यं नास्ति।

आचार्यः आश्वलायनः श्राद्धस्य चतुरो भेदान् प्रतिपादयति[4] –

(i) पार्वणश्राद्धम्

(ii) काम्यश्राद्धम्

(iii) आभ्युदयिकश्राद्धम्

(iv) एकोद्दिष्ट श्राद्धंश्च।

(i) **पार्वणश्राद्धम्** - पर्वणि क्रियमाणं श्राद्धकर्म पार्वणश्राद्ध इति संज्ञया व्यवहृतोऽस्ति।

मुख्यतया अमावास्यायामेवायं क्रियते। विमलोदयमालाकारस्तु अन्यस्यां तिथौ अर्थात् पर्वान्यतरत्वात् पूर्णिमायामपि अस्य करणीयतां विकल्पेन दर्शयति। यथोक्तं तेन –

"तदमावास्यायामन्यस्यां वा तिथौ कामसंयोगेन भवति।[1]"

नारायणवृत्तिकारस्तु केवलममायामेवास्य करणीयतां प्रतिपादयति। पूर्णमास्यां पर्वत्वेऽपि अस्य करणीयता नास्ति। सः एतद्विरुद्धं स्वमतप्रामाण्यमुपस्थापयति –

"पर्वणि भवं पार्वणमित्यन्वर्थसंज्ञा। तथाप्येकस्मिन्नेव पर्वणि भवत्यमावास्यायां नोभयोः पर्वणोः। कुतः? पिण्डपितृयज्ञेन सह व्यतिषङ्गदर्शनात्।[2]"

एवं प्रतीयते यत् विमलोदयमालाकारः तच्छब्देन पार्वणमुद्दिश्य तदमावास्यायामिति लिखति। शेषभागे काम्यं निर्दिशति – 'अन्यस्यां वा तिथौ कामसंयोगेन भवतीति।' एवं चेत् काम्यश्राद्धः अमायामपि कर्तुं शक्यते, तदतिरिक्त अन्यस्यां तिथौ पञ्चम्यां अपि कर्तुं शक्यते, पञ्चम्यां पुत्रकामस्येति[3] स्मृतिवचनात् धर्मसूत्रवचनाच्च।

**पूर्वेद्युः क्रियमाणं कर्म** - पार्वणश्राद्धः यस्मिन् दिवसे करणीयो भवेत् तस्मात्पूर्वदिवसे ब्राह्मणान् आमन्त्रयेत्। श्राद्धकर्मणि ये ब्राह्मणा आमंत्रिता भवेयुस्ते श्रुतशीलवृत्तसम्पन्ना भवेयुः। अत्र स्तेनाः क्लीबाः पतिता विकलाङ्गाश्च वर्जिताः।[4] आमन्त्रितान् ब्राह्मणान् भोजयेत्।

भोजनादूर्ध्वं चैकरात्रं भोक्तुर्भोजयितुश्चोभयोः ब्रह्मचर्यपालनमनिवार्यमस्ति। एवमेव यावत् श्राद्धकर्म न सम्पद्येत तावत् अनध्यायस्याप्युल्लेखं करोति विमलोदयमालाकारः।[1]

**परेद्युः (अमायां) क्रियमाणं कर्म** - परेद्युः अर्थात् ब्राह्मणामन्त्रणादग्रिमे दिवसे अमावास्यायां तिथौ श्राद्धस्य करणीयता भवति। तदा सर्वप्रथमं पिण्डपितृयज्ञसम्पादनं कुर्यात्।[2] पिण्डपितृयज्ञं सम्पाद्य संस्कर्ता आमन्त्रितान् ब्राह्मणान् श्राद्धकर्म सम्पादयितुमुपवेशयेत्। अत्र विधिमाह –

"अत्र तु विश्वेदेवार्थं द्वौ ब्राह्मणौ प्राड् मुखावासनयोः उपवेश्य तयोर्दक्षिणतः पित्रर्थानासनेषूदड् मुखान् उपवेशयेत्। यथाक्रमं सर्वेषां कनिष्ठः पितुर्भवति। एवमुत्तरयो एकैकमेकैकस्याथवा विश्वेदेवार्थमेकमेवोपवेश्य पित्रर्थे चैकमेवोपवेशयतेत्।"[3]

एवं उपवेशनानन्तरं संस्कर्ता ब्राह्मणाय अपः ददाति। अत्रोक्तं आग्नेयाभिमुखीभूय प्राचीनावीती भूत्वा चापः दद्यादिति। ततो द्विगुणभुग्नान् दर्भान् आसनं प्रददाति। ततः पात्रे तिलावपनं करोति। अत्र तिलावपनविधिं विशेषेण प्रतिपादयति –

"दर्भेषु प्राग्दक्षिणसंस्थानि पात्राणि निधाय, पात्रेषु चापो निनीय 'शन्नो देवी.' इत्यनेनाभिमन्त्रितास्वप्सु 'तिलोऽसीति.' मन्त्रेण प्रतिपात्रं तिलावपनं कुर्यात्।[5]"

तत्पश्चाद् यज्ञोपवीती संस्कर्ता पितृभ्योऽयं दद्यात्। अत्र मंत्रमाह 'स्वधाऽ.' इति। अर्घ्यं पितृतीर्थेन देयमिति निर्देशः। प्रथमपात्रस्थमपः पित्रे द्वितीयपात्रस्थमपः पितामहेम्यः तृतीयपात्रस्थमपः प्रपितामहेभ्यः इति क्रमेण देयम्। विमलोदयामालाकारः दानमन्त्रविषयकमप्युल्लेखं करोति – 'एवमितराभ्यां दानमन्त्रः प्रतिब्राह्मणमावर्तते'[1] इति।

अर्घ्यदानानन्तरं गन्धादिप्रदानम् अग्नौकरणानुज्ञा, प्रत्यनुज्ञादि कार्याणि क्रियमाणानि भवन्ति। पश्चादग्नौ होमो विधीयते। तत्पश्चात् ब्राह्मणभोजनं भवति। हुतशेषमन्त्रं ब्राह्मणेभ्यो भोजनाय देयमिति निर्देशः। तत आचान्तेषु पिण्डनिपरणं कृत्वा उदकनिनयनादिभिः अवशिष्टं पिण्डपितृयज्ञं समापयेत्। ततो विसर्जनं विधीयते।

(ii) **काम्यश्राद्धः** - पुत्रादेः कामनया क्रियमाणं श्राद्धं काम्यश्राद्धमित्युच्यते [3]। विधिःत्वस्य पार्वणवदेव भवति, अतएव पृथक् नैव दर्शितः।

**(iii) आभ्युदयिकश्राद्धः -** अभ्युदयप्राप्तये अयं श्राद्धो विधीयते। अत्र अभ्युदयं निमित्तं भवति, अतएव नैमित्तिकोऽयम्। स्मृत्युक्तेषु सम्पादयितव्यो भवति। अस्यापि विधिः पार्वणवदेव भवति, अतएव पृथक् नैव दर्शितः।

**(iv) एकोद्दिष्टश्राद्धः** – एकमेव पितरम् उद्दिश्य क्रियमाणः श्राद्ध एकोद्दिष्ट इत्युच्यते।' एकोद्दिष्टं प्रायः मृतकस्य एकादशे दिवसे विधीयते, अतः अयम् एकादशाह इत्यप्युच्यते[2] । विधिस्त्वस्यापि पार्वणवदेवास्ति। अतएवास्यापि विधिः न पथग्दर्शितः।

एवं श्राद्धकर्म प्रतिपाद्यास्मिन्नध्यायेऽन्ते शलगवं नाम कर्म वर्णितोऽस्ति।

**(घ) शूलगवं कर्म -** रूद्रदेवनिमित्तं गोपशुना यः यागः क्रियते तस्य शूलगव इति संज्ञाऽस्ति। अस्य कर्मणः परिगणनं काम्यकर्मसु कृतमस्ति। यदा महामारीजन्यः प्रकोपो भवति अथवा सम्पूर्णग्रामः सम्पूर्ण देशो वा विपद्ग्रस्तो भवति तदेदं कर्म तन्निवारणमुद्दिश्य विधीयते। आश्वलायनगृह्यसूत्रानुसारं इदं कर्म वसन्ततौ आर्द्रानक्षत्रे करणीयम्।[3] अत्र मतान्तरं दर्शयति विमलोदयमालाकारः

"ग्रामाद् बहिः ग्रामः पुरुषैर्न दृश्येत तत्रार्धरात्रादूर्ध्वमुदिते चादित्ये एतत्कर्म कुर्यादिति।[4]"

अत्रान्यान्यपि मतान्तरणि लक्ष्यन्ते। तथा हि बोधायनः मार्गशीर्षे पौर्णमास्यां, मनुः शरदि पौर्णमास्यां च करणीयतां दर्शयतः[5]।

अस्य यागस्य सम्पादनाय पशोरालम्भनं क्रियते। सर्वप्रथमं व्रीहियवमयाभिरद्भिः तस्य अभिषेको विधीयते। तत्पश्चात् पशुकल्पवद्विधिना यूपाबद्धं कृत्वा प्रोक्षणं उपाकरणं पर्यग्निकरणं संज्ञपनं च विधीयन्ते। पश्चात् तदीयं प्रत्येकमङ्गेषु गृहीत्वा द्वादश शिवनामभिराहुतिदानं सम्पाद्यते।[1] द्वादश शिवनामान्येव मुद्दिष्टानि –

(i) हराय स्वाहा (ii) मृडाय स्वाहा (iii) शर्वाय स्वाहा (iv) शिवाय स्वाहा (v) भवाय स्वाहा (vi) महादेवाय स्वाहा (vii) उग्राय स्वाहा(viii) भीमाय स्वाहा (ix) पशुपतये स्वाहा(x) रुद्राय स्वाहा (xi) शंकराय स्वाहा (xii) ईशानाय स्वाहा

ततः स्थालीपाकस्याहुतयोऽप्येभिर्मन्त्रैरेव प्रदीयन्ते। तत्पश्चात् स्विष्टकृद्होमं कृत्वा हुतशेषेण चरुणा क्रमेण पूर्वादिषु दिक्षु बलिं प्रदाय दिगुपस्थानं क्रियते।[2] अत्र दिक्षु बलिप्रदानमन्त्रा विनिर्दिष्टाः सन्ति[3] –

पूर्वस्याम् – 'यास्ते रुद्र पूर्वस्यां दिशि सेनास्ताभ्य एनं नमस्ते अस्तु मा मा हिंसीः'

दक्षिणस्याम् – 'यास्ते रुद्र दक्षिणस्यां दिशि सेनास्ताभ्य एनं नमस्ते अस्तु मा मा हिंसीः'

पश्चिमस्याम् – 'यास्ते रुद्र पश्चिमस्यां दिशि सेनास्ताभ्य एनं नमस्ते अस्तु मा मा हिंसीः।'

उत्तरस्याम् – 'यास्ते रुद्र उत्तरस्यां दिशि सेनास्ताभ्य एनं नमस्ते अस्तु मा मा हिंसीः।'

तत्पश्चात् स्थालीपाकावशिष्टं पश्वङ्गावशिष्टं च अग्नेरुत्तरस्यां आस्तृतासु कुशासु निपातयेत्। (अत्र मन्त्रः संकेतितः– 'श्वासिनी घोषिणी.'[1] इति।) पश्चात् सर्पानुद्दिश्यापि अमुं मन्त्रमेव जपेत्। तन्निमित्तं च तदवशेषं पद्यात्। अन्ते स्वस्त्ययनं पठेत्। पश्चात् ग्राम प्रविशेत्। ग्रामप्रवेशकाले शान्तिपाठं कुर्यात् । अत्र सूत्रकारः विशेषं निर्दिशति यत् हुतशेषस्य प्राशनं कदापि न कुर्यात्। अस्य अंशमात्रमपि ग्रामे न नयेत्। हुतशेषद्रव्यमध्ये पुत्रादीनामपि गमनं वर्जितमस्ति[3]।

पशुषु व्याधिपीडितेषु सत्सु आश्वलायनः गोशालायां स्थालीपाकेनैवास्य करणीयताया विकल्पमपि निर्दिशति। अत्र कर्मसमाप्तौ तत्रस्थान् पशून् अग्निसमीपं नीत्वा तन्मध्ये शान्तातापीयसूक्तं जपेत् इति विशेषमाह[4]। एवमाश्वलायनगृह्यसूत्रस्य विमलोदयमालाख्यायां टीकायां समाजिकपरम्पराणां धार्मिकसंस्काराणां, कर्मकाण्डीयक्रियाकलापानां च दृष्ट्या पर्याप्तं साङ्गोपाङ्गता विद्यते। विषयवस्तुनो गाम्भीर्यमस्ति। गृह्ययज्ञानां वैशिष्ट्यं तदन्तर्गतक्रियमाणानां विविधकृत्यानां च वैज्ञानिकं प्रतिपादनमत्र सुविज्ञातं प्रतीयते। अस्यां टीकायां कृत्यविशेषे सन्दर्भितनिर्देशा कर्मकाण्डीयदृष्ट्या विशेषमहत्त्वपूर्णाः सन्ति। मध्ये मध्ये सूत्रकारमतविमर्शः विषयावबोधाय उपयोगी लक्ष्यते, यत्र सूत्रोक्ततथ्यानां स्पष्टीकरणं कृतमस्ति। यतो हि सूत्रे संक्षेपेण विधिकथनं यत्र विद्यते तत्र प्रक्रियाबोधः सम्यग् न भवति, अतएव टीकाकारः अस्यावधानं रक्षमाणो वर्तते।

यथावश्यकं कर्मप्रयोज्यमन्त्राः संकेतिताः सन्ति। तत्रानेके सूत्रकाराद्भिन्ना अपि सन्ति। टीकाकारः अपेक्षिकविषयाणां विस्तरेण प्रतिपादनं करोति। तेन टीकान्तरापेक्षयाऽप्यस्याः टीकाया वैशिष्ट्यं विज्ञातं भवति।

**सन्दर्भग्रन्थाः**


1. आश्वलायनगृह्यसूत्रम् – 4/7/1
2. विमलोदयमाला–4/7/1 (सू.1583)
3. नारायणवृत्ति – 4/7/1
4. आपस्तम्बधर्मसूत्रम् – (कर्कभाष्य)/पृ.322
5. विमलोदयमाला–4/7/2 (सू.1584, 1584)
6. विमलोदयमाला – 4/7/3 (स.1586)
7. विमलोदयमाला–4/7/4 (स.1587)
8. विमलोदयमाला–4/7/4 (सू.1589–1590)
9. विमलोदयमाला –4/71/5,6 5 विमलोदयमाला – 4/7/8
10. विमलोदयमाला –4/7/13 (सू.1610)
11. विमलोदयमाला – 4/7/15